षोडश। तेषु केचिदुदात्ताः केचिदनुदात्ताः[1]। [2]असामसु इति किम्? विश्वं समत्रिणं दह (जै.सं.अ.११)। सामानि वाक्य[3]विशेषस्थगीतय [4]उच्यन्ते। तत्रैकश्रुतिर्न भवति ॥

## उच्चैस्तरां वा वषट्कारः। (३५/३६६४)

यज्ञकर्मणि इति वर्तते। यज्ञकर्मणि वषट्कारः उच्चैस्तरां वा भवति एकश्रुतिर्वा। वषट्शब्देना[5]त्र वौषट् शब्दो लक्ष्यते। वौषट् [6]इत्यस्यैवेदं स्वरविधानम्। यद्येवं वौषड्ग्रहणमेव कस्मान् न कृतम्[7]? [8]वैचित्र्यार्थम्। विचित्रा हि सूत्रस्य कृतिः पाणिनेः।'[9]सोमस्याग्ने वीही३ वौ३षट्। सोमस्याग्ने [10]वीही३ वौ३षट्' (ऐ.ब्रा. ३.५.४.६.) ॥

## विभाषा छन्दसि। (३६/३६६५)

छन्दसि विषये विभाषा एकश्रुतिर्भवति। [11]पक्षान्तरे त्रैस्वर्यमेव [12]भवति। वा इति प्रकृते विभाषाग्रहणं यज्ञकर्मणि इत्यस्य निवृत्त्यर्थम्। [13]तेनायं [14]स्वाध्यायकालेऽपि पाक्षिक [15]ऐकश्रुत्यविधिर्भवति। 'इषे त्वोर्जे त्वा'। 'इषे त्वोर्जे त्वा' (वा सं. १.१.१)। 'अग्न आयाहि वीतये'। 'अग्न आयाहि वीतये' (ऋ.६.१६.१०)। 'अग्निमीळे पुरोहितम्'। 'अग्निमीळे पुरोहितम्' (ऋ. १.१.१)। 'शं नो देवीरभिष्टये'। 'शं नो देवीरभिष्टये' (ऋ. १०.९.४)[16] ॥

## न सुब्रह्मण्यायां स्वरितस्य तूदात्तः। (३७/३६६६)

सुब्रह्मण्या नाम निगदस्तत्र यज्ञकर्मणि (१.२.३४/३६६३) इति[17] 'विभाषा छन्दसि' (१.२.३६/३६६५) इति च एकश्रुतिः प्राप्ता प्रतिषिध्यते। सुब्रह्मण्यायामेकश्रुतिर्न भवति। यस्तु लक्षणप्राप्तः स्वरितस्तस्योदात्त आदेशो भवति। 'सुब्रह्मण्योम्। इन्द्रागच्छ, हरिव आगच्छ, मेधातिथेर्मेष वृषणश्वस्य मेने। गौरावस्कन्दिन्नहल्यायै जार कौशिकब्राह्मण गौतमब्रुवाण श्वः सुत्यामागच्छ मघवन्' (श. ब्रा. ३.३.१.१९)[18]। [19]अत्र सुब्रह्मण्योम् इत्यो[20]कारस्तित्स्वरेण स्वरितस्तस्योदात्तो विधीयते। इन्द्र आगच्छ इत्यामन्त्रितमाद्युदात्तम्। द्वितीयो [21]वर्णोऽनुदात्तः। [22]उदात्तादनुदात्तस्य स्वरितः (८.४.६६/३६६०) इति [23]स्वरितः प्रसक्तस्तस्यानेनोदात्तः क्रियते। तेन द्वावप्युदात्तौ [24]सम्पन्नौ। आगच्छ [25]इत्याकार उदात्तः ततः परोऽनुदात्तः स्वरितस्तस्यानेनोदात्तः क्रियते। [26]तदेवम् इन्द्र आगच्छ इति चत्वार उदात्ताः। पश्चिम एकोऽनुदात्तः। [27]हरिव आगच्छ इत्यनयैव प्रक्रियया चत्वार उदात्ताः द्वावनुदात्तौ। मेधातिथेः[28] इति षष्ठ्यन्तं परमामन्त्रितमनुप्रविशति[29] 'सुबामन्त्रिते पराङ्गवत्स्वरे' (२.१.२/३६५६) इति। ततः सकलस्या[30]मन्त्रिताद्युदात्तत्वे [31]कृते द्वितीयमक्षरमनुदात्तं, [32]तस्य 'उदात्तादनुदात्तस्य स्वरितः' (८.४.६६/३६६०) इति [33]स्वरितत्वे प्राप्ते इदमुदात्तत्वं

---

1. वृषा कपौ इत्यधिकम् ह. 2. असामेषु ग. ह. 3. विशेषस्था ड. ह. फ. 4. उच्यन्ते नास्ति फ. ह. 5. वात्र ह. 6. एतद् तस्येदं ह. 7. भवति इत्यधिकम् ग. 8. नास्ति ब. ड. फ. ह. 9. एते उदाहरणे न स्तः ग. 10. व्रीहौ ब. 11. पक्षे क. 12. भवति नास्ति क. 13. तेनेयं पाक्षिकी एकश्रुतिर्भवति ह. 14. स्वाध्यायाध्ययन-काले ड. 15. ऐकश्रुत्यविभक्तिः क. 16. व्यवस्थितविभाषाविकल्पोऽयम् इति केचित्। व्यवस्था च वेदे मन्त्रदले नित्यं त्रैस्वर्यं, ब्राह्मणदले नित्यमैकश्रुत्यम् इति। 'इच्छासंहितयोरार्षे छन्दो वेदे च छन्दसि' इति नानार्थकोशात्। छन्दसि वर्णसंहितायाम् इति भट्टाचार्यचरणा इति। भाषायामप्येकश्रुतिर्विभाषा भवति इति सिद्धम् इत्यधिकं मुद्रितपुस्तकेषु 17. च इत्यधिकम् ग. 18. इति इत्यधिकम् फ. 19. अत्र–उदात्तः नास्ति ह. ग. 20. ओंकारस्तित्स्वरेण क. ड. 21. वर्णो नास्ति ब. 22. तस्य इत्यधिकम् ड. 23. स्वरितप्रसक्तः क. 24. भवतः फ. 25. इत्यत्राकारः फ. 26. द्वावप्युदात्तौ संपन्नौ इत्यधिकम् फ. 27. हरव ह. 28. मेष ह. 29. इति ह. 30. आमान्त्रितस्याद्युदात्तत्वे फ. 31. कृते नास्ति ह. 32. भवति फ. 33. स्वरितत्वे प्राप्ते इदम् नास्ति ह.